स्यस्येति । अण् ।) तुतातभट्टमतं न्यायशास्त्रम् उदयनाचार्य्यमतं न्यायशास्त्रम् एतदुभयशास्त्रवेत्ता । एतदुभयमतं जानाति यः इत्यर्थे ढयैकादिति कारकात् कर्त्तरि अणिता णप्रत्ययेन निष्पन्नः ॥

भट्टारः, त्रि, (भटतीति । भट् + क्विप् । भट् चासौ तारश्चेति कर्म्मधारयः । पृषोदरादित्वात् साधुः । यद्वा भर्त्तृ स्वामित्वं ऋच्छतीति । अण् ।) पूज्यः । इति त्रिकाण्डशेषः ॥ (यथा, राजतरङ्गिण्याम् । ७ । ८६७ ।
"नोनसिङ्गारभट्टारप्रशस्तकलसादयः ।
बद्धाथ हर्षदेवेन कारागारं प्रवेशिताः ॥")

भट्टारकः, पुं, (भट्टार । संज्ञायां कन् ।) नाट्योक्तौ राजा । इत्यमरः ।१।७।१३॥ देवः । तपोधनः । इति मेदिनी । के, २५० ॥ पूज्ये, त्रि । इति जटाधरः ॥ (यथा, राजतरङ्गिण्याम् ।६।२४०।
"प्रविष्टेषु ततः कोपात् पुरं शुभधरादिषु ।
भट्टारकामठे दिद्दा भूयः पुत्त्रं व्यसर्ज्जयत् ॥")

भट्टारकवारः, पुं, (भट्टारः संज्ञायां कन् । भट्टारकः सूर्य्यः तस्य वारः ।) रविवारः । यथा,—
"सखे ! स्नायुर्निर्म्मितपाशास्तदद्य भट्टारकवारे कथमेतान् दन्तैः स्पृशामि ॥" इति हितोपदेशे १ परिच्छेदे मृगं प्रति जम्बूकवाक्यम् ॥

भट्टिः, पुं, स्वनामख्यातरामकथाश्रयमहाकाव्यम् । तत्तु वलभीवास्तव्यश्रीस्वामिसूनुभट्टमहाब्राह्मणमहावैयाकरणेन कृतम् । इति जयमङ्गलकृता तट्टीका ॥ एतत् काव्यं भर्त्तृहरिणा कृतमिति भरतमल्लिकेन लिखितम् ॥

भट्टिनी, स्त्री, (भट्टं स्वामित्वमस्या अस्तीति । भट्ट + इनिः + ङीप् ।) नाट्योक्तौ अकृताभिषेका राजपत्नी । इत्यमरः । १ । ७ । १३ ॥ ब्राह्मणभार्य्या । इति मेदिनी । ने, ३१ ॥

भड इक् शिवे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् । इदित् ।) शिवं कल्याणक्रिया वेदेष्वेव । प्रतारणे प्रसिद्धोऽयम् । इक् भण्डयति प्रतारको मुग्धं धनदानाङ्गीकारेण । इति दुर्गादासः ॥

भड इ ङ वाचि । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) परिभाषण इति गोविन्दभट्टः । परिहास इति चतुर्भुजः । इ भण्ड्यते ङ भण्डते षिड्गीं लोकः । इति दुर्गादासः ॥

भड़ः, पुं, (भड़तीति । भड़ इ ङ परिहासे परिभाषणे वा + अच् ।) वर्णसङ्करजातिविशेषः । स तु लेटात् तीवरकन्यायां जातः । यथा,—
"लेटस्तीवरकन्यायां जनयामास षट्सुतान् ।
माल्लं मल्लं मातरञ्च भड़ं कोलञ्च कन्दरम् ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः ॥

भड़िलः, पुं, (भड़तीति । भड़ि + "सलिकल्यनिमहिभड़िभण्डीति ।" उणा० १ । ५५ । इति इलच् ।) सेवकः । शूरः । इत्युणादिकोषः ॥

भण क शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-द्विक०-सेट् ।) क अबीभणत् अबभाणत् स चेह व्यक्तवाक्यम् । श्रीजयदेवकृतहरिसेवं भणति परमरमणीयम् । इति दुर्गादासः ॥

भणितं, त्रि, (भण + क्तः ।) शब्दितम् । कथितम् । यथा,—
"श्रीजयदेवभणितमिदमद्भुतकेशवकेलिरहस्यम् ।"
इति गीतगोविन्दः ॥

भणितिः, स्त्री, (भण्यते इति । भण + क्तिन् ।) वाक्यम् । इति भूरिप्रयोगः त्रिकाण्डशेषश्च ॥ (यथा, राजतरङ्गिण्याम् । ४ । ५४ ।
"नियन्त्रिता यद्भणितिस्तद्गुणोदीरणादियम् ।
अतिप्रसङ्गभङ्गात्तन्नैयत्त्यावाप्तितः पुनः ॥")

भण्टाकी, स्त्री, (भव्यते भण्यते वा । भट् भृतौ भणशब्दे वा + "पिनाकादयश्च ।" उणा० । ४ । १५ । इति आक । निपात्यते च । गौरादित्वात् ङीष् ।) वार्त्ताकी । इत्यमरः । २ । ४ । ११४ ॥ बृहती । इति रत्नमाला ॥ (वृन्ताकम् । तत्पर्य्यायो यथा,—
"वृन्ताकं स्त्री तु वार्त्ताकुर्भण्टाकी भाण्टिकापि च ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

भण्टुकः, पुं, (भड़तीति । भड़ि-उकन् ।) श्योनाकवृक्षः । इति रत्नमाला ॥ क्वचित् भण्डुकोऽपि पाठः ॥

भण्डः, पुं, (भण्डते इति । भड़ि प्रतारणे + अच् ।) अश्लीलभाषी । भाँड़ इति भाषा । इति संक्षिप्तसारोणादिवृत्तिः ॥ तत्पर्य्यायः । चाटुपटुः २ । इति भूरिप्रयोगः ॥

भण्डकः, पुं, (भण्ड + संज्ञायां कन् ।) खञ्जनपक्षी । इति जटाधरः ॥

भण्डनं, क्ली, (भड़ि + भावादौ ल्युट् ।) खलीकारः । कवचम् । युद्धम् । इति मेदिनी । ने, १०० ॥

भण्डहासिनी, स्त्री, (भण्डेन खलीकारेण हसति या । हस् + णिनिः । ङीप् ।) गणिका । इति शब्दरत्नावली ॥

भण्डिः, स्त्री, (भड़ि + इन् ।) वीचिः । इति हारावली ॥

भण्डिका, स्त्री, मञ्जिष्ठा । इति शब्दरत्नावली ॥

भण्डिरः, पुं, (भण्डिल + रलयोरैक्यम् ।) शिरीषवृक्षः । यथा । भण्डिलो भण्डिरो नेमीति भरतधृतवाचस्पतिः ॥

भण्डिलः, पुं, (भण्डते परिहसतीवेति भाषते इवेति वा । भड़ि + "सलिकल्यनिमहिभड़िभण्डीति ।" उणा० १ । ५५ । इति इलच् ।) शिरीषवृक्षः । इत्यमरः । २ । ४ । ६३ ॥ (तत्पर्य्यायो यथा,—
"शिरीषो भण्डिलो भण्डी भण्डीरश्च कपीतनः ।
शुकपुष्पः शुकतरुर्मृदुपुष्पः शुकप्रियः ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

भण्डिलः, त्रि, (भड़ि + इलच् ।) शुभः । दूतः । इत्युणादिकोषः ॥ शिल्पी । इति संक्षिप्तसारोणादिवृत्तिः ॥

भण्डी, स्त्री, (भण्डते इति । भड़ि-इन् ।) कृदिकारादिति पक्षे ङीष् ।) मञ्जिष्ठा । इत्यमरः । २ । ४ । ९१ ॥ (पर्य्यायोऽस्या यथा,—
"मञ्जिष्ठा विकसा जिङ्गी समङ्गा कालमेषिका ।
मण्डूकपर्णी भण्डीरी भण्डी योजनवल्ल्यपि ॥
रसायन्यरुणा काला रक्ताङ्गी रक्तयष्टिका ।
भण्डीतकी गण्डीरी च मञ्जूषा वस्त्ररञ्जिनी ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
शिरीषवृक्षः । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्या यथा,—
"शिरीषो भण्डिलो भण्डी भण्डीरश्च कपीतनः ।
शुकपुष्पः शुकतरुर्मृदुपुष्पः शुकप्रियः ॥"
श्वेतत्रिवृता । तत्पर्य्यायो यथा,—
"श्वेतात्रिवृता भण्डी स्यात् त्रिवृता त्रिपुटापि च ।
सर्व्वानुभूतिः सरला निशोत्रा रेचनीति च ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

भण्डीतकी, स्त्री, (भण्डी सती तकतीति । तक + अच् । गौरादित्वात् ङीष् ।) मञ्जिष्ठा । इति भावप्रकाशः ॥

भण्डीरः, पुं, (भड़ि + बाहुलकात् ईरन् ।) समष्ठिलक्षुपः । तण्डुलीयशाकः । (यथा,—
"तण्डुलीयो मेघनादः काण्डेरस्तण्डुलेरकः ।
भण्डीरस्तण्डुली बीजो विषघ्नश्चाल्पमारिषः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)
शिरीषवृक्षः । इति राजनिर्घण्टः ॥ (वटवृक्षः । यथा, रामायणे । ३ । ७५ । २४ ।
"मालतीकुन्दगुल्मैश्च भण्डीरैर्निचुलैस्तथा ।
अशोकैः सप्तपर्णैश्च केतकैरतिमुक्तकैः ॥"
"भण्डीरो वटः ।" इति तट्टीकायां रामानुजः ।)

भण्डीरलतिका, स्त्री, (भण्डीर इव लतते इति । लतिः सौत्रो धातुः + अच् । स्वार्थे कन् । टाप् अत इत्वम् ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥

भण्डीरी, स्त्री, (भण्डीर । गौरादित्वात् ङीष् ।) मञ्जिष्ठा । इत्यमरः ॥

भण्डीलः, पुं, (भण्डीर । रलयोरैकत्वम् ।) मञ्जिष्ठा । इति शब्दरत्नावली ॥

भण्डूकः, पुं, (भड़ि + ऊक् ।) मत्स्यविशेषः । भाङ्गुर इति भाषा । अस्य गुणाः । मधुरत्वम् । शीतलत्वम् । वृष्यत्वम् । श्लेष्मकरत्वम् । गुरुत्वम् । विष्टम्भित्वम् । रक्तपित्तहरत्वञ्च । इति भावप्रकाशः ॥ श्योनाकवृक्षः । इति रत्नमाला ॥

भद इक् शुभे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) इक् भन्दयति शुभं कल्याणक्रिया । इति दुर्गादासः ॥

भद इ ङ हर्षे । प्रीतौ । शुभे । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट्-इदित् ।) इ भन्द्यते । ङ भन्दते पण्डितः सदा । इति दुर्गादासः ॥

भदन्तः, पुं, (भन्दते इति । भदि कल्याणे + "भन्देर्नलोपश्च ।" उणा० ३ । १३० । इति झच् । नलोपश्च ।) सौगतादिबुद्धः । इति हेमचन्द्रः ॥ मायादेवीसुतः । सुतेजः । पूजिते, त्रि । इत्युणा-